# A

**23728** **120 MINUTES**

1. अथातो ब्रह्मजिज्ञासा इति केन आचार्येण उक्तः?
   A) जैमिनिना B) बादरायणेन C) व्यासेन D) भरतेन

2. शास्त्रयोनित्वात् इत्यत्र शास्त्रपदेन उद्दिष्टः कः?
   A) वेदः B) पुराणम् C) दर्शनम् D) काव्यम्

3. मायायाः अपरं नाम किम् ?
   A) अधर्मः B) अध्यासः C) प्रकृतिः D) परा विद्या

4. आरम्भवादः इति केषां मतम्?
   A) तार्किकानाम् B) प्राभाकराणाम् ।
   C) वेदान्तिनाम् । D) चार्वाकानाम् ।

5. ब्रह्मसूत्रेषु कस्य जिज्ञासा प्रतिपादिता?
   A) मायायाः B) प्रकृतेः C) कर्मणः D) ब्रह्मणः

6. जैमिनिकृतस्य मीमांसासूत्रग्रन्थस्य नामान्तरम् किम्?
   A) सांख्यसूत्रम् B) योगसूत्रम् C) द्वादशलक्षणी D) ब्रह्मसूत्रम् ।

7. कस्मिन्नुपनिषदि यमः नचिकेतसे वरान् अदात्?
   A) कठोपनिषदि B) केनोपनिषदि
   C) तैत्तिरीये D) ईशावास्योपनिषदि

8. यथोचितं योजयत-

| | |
|---|---|
| a. भट्टिः | 1. ऋतुसंहारः |
| b. सुबन्धुः | 2. शिशुपालवधम् |
| c. कालिदासः | 3.वासवदत्ता |
| d. माघः | 4.रावणवधम् |

   A) a-3, b-4, c-2, d-1 B) a-4, b-3, c-1, d-2
   C) a-2, b-4, c-1, d-3 D) a-2, b-4, c-3, d-1

9. ऋग्वेदे प्रथमसूक्ते का देवता उपवर्णिता?

A) इन्द्रः B) रुद्रः C) अग्निः D) विष्णुः

10. प्रतिमानाटकस्य कर्ता कः?

A) शूद्रकः B) भासः C) कालिदासः D) भवभूतिः

11. नारायणीयस्तोत्रकाव्यस्य कर्ता कः?

A) मेल्पुत्तूर नारायणभट्टः B) शङ्करः

C) कृष्णलीलाशुकः D) कालिदासः

12. पञ्चतन्त्रे प्रथमं तन्त्रं किम्?

A) काकोलूकीयम् B) अपरीक्षितकारकम्

C) मित्रभेदः D) लब्धप्रणाशः

13. तोटकवृत्ते कः गणः प्रयुज्यते?

A) भगणः B) सगणः C) मगणः D) यगणः

14. चेद्बिम्बप्रतिबिम्बत्वं ----- तदलङ्कृतिः।

A) दीपकम् B) अनन्वयः C) व्यतिरेकः D) दृष्टान्तः

15. कन्नडाभाषा कस्मिन् भाषागोत्रे अन्तर्भवति?

A) केल्टिक् B) द्राविड C) आर्य D) चैनीस्

16. वैदिकमन्त्रेषु प्राधान्येन वर्णिता देवता का?

A) इन्द्रः B) विष्णुः C) वरुणः D) रुद्रः

17. संगीतप्रधानः वेदः कः?

A) सामवेदः B) अथर्ववेदः C) नाट्यवेदः D) ऋग्वेदे

18. एतेषु अर्थविकासस्य उदाहरणं किम्?

A) तैलम् B) पिता C) पङ्कजम् D) द्वादश

19. इक् प्रत्याहारे अन्तर्भूताः वर्णाः के?

A) इ उ ऋ लृ B) क ख ग घ C) य व र ल D) ह र ल प

20. रघुवंशानुसारेण दिलीपस्य राज्ञः पत्नी का?

A) सुमित्रा B) सुदक्षिणा C) कौसल्या D) इन्दुमती

21. उषस्सूक्तम् कस्मिन् वेदे वर्तते?

A) सामवेदे B) यजुर्वेदे C) ऋग्वेदे D) अथर्ववेदे

22. अधोनिर्दिष्टेषु श्रीशङ्करेण रचितं स्तोत्रं किम्?

A) श्रीकृष्णकर्णामृतम् B) नारायणीयम्

C) सौन्दर्यलहरी D) मुकुन्दमाला

23. पुरूरवाः कालिदासस्य कस्मिन् नाटके नायकः भवति?

A) मालविकाग्निमित्रे B) ऊरुभङ्गे

C) शाकुन्तले D) विक्रमोर्वशीये

24. अभिधावृत्तिमातृका इति ग्रन्थस्य कर्ता कः?

A) बिल्हणः B) भोजः C) मुकुलभट्टः D) धनिकः

25. यथोचितं योजयत-

a. पञ्चरात्रम् 1. भवभूतिः

b. मालतीमाधवम् 2. कुलशेखरः

c. मृच्छकटिकम् 3. भासः

d. तपतीसंवरणम् 4. शूद्रकः

A) a-1, b-3, c-4, d-2 B) a-2, b-4, c-1, d-3

C) a-2, b-1, c-4, d-3 D) a-3, b-1, c-4, d-2

26. नैषधीयचरितमहाकाव्ये कति सर्गाः सन्ति?

A) शतम् B) द्वाविंशति C) विंशति D) अष्टादश

27. अभिहितान्वयवादिनः के?

A) भाट्टमीमांसकाः B) प्राभाकराः

C) वेदान्तिनः D) चार्वकाः

28. शीतोष्णादिद्वन्द्वसहिष्णुता नाम किम्?

A) शमः B) दमः C) तितिक्षा D) उपरमः

29. वस्तुन्यवस्त्वारोपः----।

A) अध्यारोपः B) अनुशयः C) अर्थापत्तिः D) अभावः

30. ज्ञानेन्द्रियाणि कति?

A) दश B) नव C) द्वादश D) पञ्च

31. परिणामवादिनः के?

A) नैयायिकाः B) वैशेषिकाः C) सांख्याः D) मीमांसकाः

32. परित्राणाय ----- संभवामि युगे युगे।

A) दुष्कृताम् B) साधूनाम् C) मुनीनाम् D) राज्ञाम्

33. संभावितस्य च ------ मरणात् अतिरिच्यते।

A) प्रसिद्धिः B) अकीर्तिः C) दारिद्र्यम् D) प्रहारम्

34. ----- सर्वकर्माणि भस्मसात्कुरुतेर्जुन।

A) क्रोधाग्निः B) बडवाग्निः C) ज्ञानाग्निः D) दीप्ताग्निः

35. गतासूनगतासूंश्च पण्डिताः किं न कुर्वन्ति?

A) संस्कुर्वन्ति B) अनुशोचन्ति। C) तुष्यन्ति D) गायन्ति

36. भगवद्गीतायां यथेच्छसि तथा कुरु इति केन उक्तम्?

A) अर्जुनेन B) कृष्णेन C) सञ्जयेन D) जनमेजयेन

37. पञ्चतन्त्रेषु द्वितीयः तन्त्रभागः कः?

A) लब्धप्रणाशः B) काकोलूकीयम्

C) मित्रलाभः D) मित्रभेदः

38. अमरसिंहकृतस्यनामलिङ्गानुशासनस्य नामान्तरम् किम्?

A) निघण्टुः B) अमरकोशः C) वैजयन्ती D) विश्वकोशः

39. भागवतपुराणे कस्य इतिवृत्तं प्राधान्येन उपवर्णितम्?

A) कृष्णस्य B) रामस्य C) शिवस्य D) इन्द्रस्य

40. कस्मिन् ग्रन्थे रससूत्रप्रस्तावमस्ति?

A) दशरूपके B) ध्वन्यालोके C) नाट्यशास्त्रे D) कव्यप्रकाशे

41. मुकुन्दमाला इति स्तोत्रकाव्यस्य कर्ता कः?

A) शङ्करः B) नारायणभट्टः
C) कुलशेखरः D) विल्वमङ्गलम्

42. अथ शब्दानुशासनम् इति कस्मिन् ग्रन्थे परामृष्टम्?

A) अष्टाध्याय्याम् B) वार्तिकेषु
C) महाभाष्ये D) लघुसिद्धान्तकौमुद्याम्

43. ‘सरसिजमनुविद्धं शैवलेनापि रम्यम्’ ----- इत्यत्र वृत्तं किम् ?

A) गीतिः B) मालिनी C) स्रग्धरा D) मन्दाक्रान्ता

44. ऋग्वेदे प्रथममण्डले प्रथमसूक्ते प्रथममन्त्रे प्रथमं पदं किम्?

A) इन्द्रम् B) अग्निम् C) प्रजापतिम् D) रुद्रम्

45. पूर्वेभिः इति कुत्र प्रयोगो दृश्यते?

A) रघुवंशे B) ऋग्वेदे
C) नैषधीयचरिते D) माघकाव्ये

46. मूषकवंशम् इति इतिहासकाव्यस्य कर्ता कः?

A) कल्हणः B) बिल्हणः C) जल्हणः D) अतुलः

47. हेमचन्द्रेन रचितः साहित्यशास्त्रग्रन्थः कः?

A) काव्यानुशासनम् B) शृङ्गारप्रकाशः
C) दशरूपकम् D) एकावली

48. सन्देशकाव्येषु प्रायेण स्वीकृतं वृत्तं किम्?

A) हरिणी B) वियोगिनी C) मन्दाक्रान्ता D) शालिनी

49. वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं ----- बुधाः।

A) व्यतिरेकः B) अनुमानम्

C) काव्यलिङ्गम् D) दीपकम्

50. उपकृष्णम् इत्यत्र कः समासः?

A) अव्ययीभावः B) तत्पुरुषः C) कर्मधारयः D) बहुव्रीहिः

51. रघुवंशकाव्यानुसारेण कुम्भोदरो नाम कः?

A) कश्चन पक्षी B) असुरः

C) गोपालः D) पार्वत्याः अनुचरः सिंहः

52. भाषाशास्त्रे प्रथितस्य निरुक्तस्य कर्ता कः?

A) पाणिनिः B) कात्यायनः C) यास्कः D) हरदत्तः

53. कुमारसंभवकाव्ये परामृष्टः परमेश्वरस्य श्वशुरः कः?

A) गणपतिः B) शास्ता C) सुब्रह्मण्यः D) हिमवान्

54. श्रीमहाकविभट्टिप्रणीतं महाकाव्यं किम्?

A) रावणवधः B) नैषधीयचरितम्

C) राघवीयम् D) वासवदत्ता

55. वक्तुरिच्छा तु ------।

A) वाच्यम् B) लक्ष्यम् C) तात्पर्यम् D) प्रतीयमानम्

56. शब्दशक्तिमूलध्वनिः कस्मिन् ध्वनिभेदे अन्तर्भवति?

A) अभिधामूलध्वनौ B) रसध्वनौ

C) लक्षणामूलध्वनौ D) रसवदलङ्कारे

57. कुन्तकेण कति वक्रताप्रकाराः निर्दिष्टाः?

A) पञ्च B) षट् C) सप्त D) दश

58. रसमयेषु काव्येषु ध्वन्यालोके किं शक्तावपि प्रमादित्वमिति गण्यते?

A) अनुप्रासः B) स्वभावोक्तिः

C) वक्रोक्तिः D) यमकादिनिबन्धनम्

59. मम्मटभट्टमते गुणीभूतव्यङ्ग्यं कतिविधा?

A) त्रिधा B) षोढा C) अष्टधा D) दशधा

60. काव्यप्रकाशानुसारेण कति गुणाः सन्ति।?

A) दश B) त्रयः C) विंशति D) सप्त

61. रसव्याख्याने चित्रतुरगन्यायः केन समर्थितः?

A) भट्टलोल्लटेन B) श्रीशङ्कुकेन

C) भट्टनायकेन D) धनिकेन

62. रससूत्रव्याख्याने उपचितिवादस्य वक्ता कः?

A) अभिनवगुप्तः B) मुकुलभट्टः

C) भट्टलोल्लटः D) भट्टनायकः

63. आश्चर्यचूडामणौ तृतीयाङ्कःकेन नाम्ना व्यवह्रियते?

A) पर्णशालाङ्कः B) अग्निशुद्ध्यङ्कः

C) मायासीताङ्कः D) शूर्पणखाङ्कः

64. स्वप्नवासवदत्ते कति अङ्काः सन्ति?

A) सप्त B) अष्टौ C) षट् D)
पञ्च

65. शक्तिभद्रस्य शङ्करेण ऐतिहयानुसारं सूचितं नामान्तरं किम्?

A) कुलशेखरः B) भुवनभूतिः C) भवभूतिः D) श्रीकण्ठः

66. ब्रहमसूत्रस्य केरलीयः व्याख्याकारः कः?

A) भास्करः। B) बादरायणः C) शङ्करः D) कपिलः

67. यमनचिकेतस्संवादः कस्यामुपनिषदि उपवर्णितः?

A) केनोपनिषदि B) कठोपनिषदि

C) मुण्डकोपनिषदि D) छान्दोग्ये

68. राम अम् इति स्थिते केन सूत्रेण रामम् इति पूर्वरूपसिद्धिः ?

A) आडजादीनाम् B) अजादिभ्यष्टाप्

C) अमि पूर्वः D) तस्यैकवचनम् ।

69. कर्तुरीप्सिततमं किम्?

A) करणम् B) सम्प्रदानम् C) अपादानम् D) कर्म

70. अपादानं नाम कारकेषु किम्?

A) आधारः B) करणम् C) अपाये ध्रुवम् D) ईप्सितमम्

71. सम्बन्धार्थे का विभक्तिः विधीयते?

A) पञ्चमी B) षष्ठी C) चतुर्थी D) सप्तमी

72. तर्कसंग्रहानुसारेण गुणाः कति?

A) दश B) नव C) द्वादश D) चतुर्विंशति

73. कार्यनियतपूर्ववृत्ति-----।

A) लिङ्गम् B) परामर्शः C) कारणम् D) कार्यम्

74. इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं नाम किम्?

A) अनुमानम् B) प्रत्यक्षम् C) शाब्दम् D) संशयः

75. कर्म कतिविधम् ?

A) दशविधम् B) नवविधम् C) चतुर्विधम् D) पञ्चविधम्

76. नित्यमेकमनेकगतं ------।

A) सामान्यम् B) मिथ्या C) गुणः D) द्रव्यम्

77. कारिकावली केन रचिता?

A) अन्नंभट्टेन B) विश्वनाथन्यायपञ्चाननेन

C) उदयनेन D) जयन्तभट्टेन

78. तार्किकमते सुवर्णं ----- भवति।

A) पार्थिवम् B) वायवम् C) कर्तृजन्यम् D) तैजसम्

79. तद्वति तत्प्रकारकं ज्ञानं किम्?

A) निर्विकल्पकम् B) सविकल्पकम्

C) अर्थक्रियाकारित्वम् D) विज्ञानम्

80. द्रव्यमात्रवृत्तिहेतुत्वम् किम्?

A) समवायि B) निमित्तम्

C) अन्यथासिद्धम् D) असमवायि

81. अभावः कतिविधः?

A) दशविधः B) चतुर्विधः C) पञ्चविधः D) षड्विधः

82. वेदान्तसारस्य कर्ता भवति-----।

A) धर्मराजः B) श्रीशङ्करः C) सदानन्दः D) भास्करः

83. अभिज्ञानशाकुन्तलनाटके दुष्यन्तस्य पुरोहितः कः?

A) माडव्यः B) वसन्तकः C) मैत्रेयः D) सोमरातः

84. शकुन्तला केन चरणः क्षतः चरण इति अकाण्डे स्थिता?

A) ताम्रपत्रेण B) दर्भाङ्कुरेण C) पङ्कजपत्रेण D) विल्वपत्रेण

85. शकुन्तलायाः सख्यौ के?

A) चैत्रमैत्रेयौ B) शार्ङरवशारद्वतौ

C) अनसूयाप्रियंवदे D) तमसामुरले

86. उदयनस्य वीणायाः नाम किम्?

A) वल्लकी B) घोषवती C) सुस्वरा D) तडिद्वती

87. कालो ह्ययं निरवधिर्विपुला च पृथ्वी इति कस्मिन् ग्रन्थे निर्दिष्टम्?

A) मालतीमाधवे B) शाकुन्तले

C) स्वप्नवासवदत्ते D) मुद्राराक्षसे

88. चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य। कस्येदं वचनम्?

A) उदयनस्य B) दुष्यन्तस्य

C) यौगन्धरायणस्य D) वसन्तकस्य

89. बृहज्जातकस्य मङ्गलश्लोके वराहमिहिरः कं प्रार्थयति?

A) विष्णुम् B) सुब्रह्मण्यम् C) चन्द्रम् D) रविम्

90. भ्रातृसत्वकारकः ग्रहः कः?

A) भौमः B) बुधः C) चन्द्रः D) गुरुः

91. वराहमिहिराचार्यस्य होराशास्त्रस्य प्रसिद्धं केरलीयसंस्कृव्याख्यानं किम्?

A) दशाध्यायी B) जातकादेशः C) बृहज्जातकम् D) मुहूर्त्तपदवी

92. मेषः कस्य नीचराशिः भवति?

A) कुजस्य B) शुक्रस्य C) शनेः D) सूर्यस्य

93. ज्योतिषे वक्रः इति पदेन कः ज्ञायते?

A) रविः B) कुजः C) शुक्रः D) बुधः

94. शुक्रस्य स्वक्षेत्रे के?

A) मेषकीटौ B) सिंहकुलीरौ C) वृषतुले D) मृगकुम्भौ

95. चतुर्थी नवमी चतुर्दशीतिथीनां सामान्यसंज्ञा का?

A) रिक्ता B) पूर्णा C) नन्दा D) जया

96. कस्मिन् कर्मणि अर्कारवासरौ न शुभौ?

A) गृहारम्भप्रवेशे B) विवाहे C) भोजने D) विद्यारम्भे

97. एकादशी तिथी कस्मिन् कर्मणि न शोभना भवति?

A) विवाहे B) उपनयने C) अन्नप्राशे D) नामकरणे

98. ग्रहेषु कं ग्रहं केनापि शत्रुभावेन न गण्यते?

A) बुधम् B) चन्द्रम् C) गुरुम् D) कुजम्

99. सिंहराशेः अधिपः कः?

A) चन्द्रः B) गुरुः C) रविः D) बृहस्पतिः

100. कल्याणवर्मणा रचितः ज्योतिषग्रन्थः।

A) सिद्धान्तशिरोमणिः B) श्रीपादसप्ततिः

C) सारावली D) लीलावती

101. लीलावती नाम ग्रन्थस्य कर्ता कः?

A) भास्करःद्वितीयः B) लल्लः

C) आर्यभटः D) वराहमिहिरः

102. वैदिकज्योतिषस्य उपज्ञाता कः?

A) आर्यभट्टः B) परमेश्वरः C) लगधः D) ब्रह्मगुप्तः

103. आर्यभटीयस्य आद्यः पादः कः?

A) कालपादः B) गोलपादः

C) गीतिकापादः D) कालक्रियापादः

104. आर्यभटीये कति पादाः सन्ति?

A) पञ्च B) अष्टौ C) चत्वारः D) दश

105. पावकः इत्यत्र केन सूत्रेण सन्धिकार्यः?

A) एचोयवायावः B) उरण् रपरः

C) इको यणचि D) अकः सवर्णे दीर्घः

106. वृक्षेण इत्यत्र केन सूत्रेण नकारस्य णत्वम्?

A) रेफः परस्य B) रषाभ्यां नो णः समानपदे

C) शात् D) अचोन्त्यादि टि।

107. नीलोत्पलम् इत्यत्र कः समासः?

A) बहुव्रीहिः B) कर्मधारयः C) षष्ठीतत्पुरुषः D) द्विग्गुः

108. विजयते इत्यत्र कस्मात् सूत्रात् आत्मनेपदम्?

A) विपराभ्यां जेः B) व्याङ्परिभ्यो रमः

C) अनुपसर्गात् D) कर्तरि कर्मव्यतिहारे

109. गोशब्दस्य द्वितीयाबहुवचनेरूपम् ।

A) गवि B) गवान् C) गाः D) गावान्

110. कर्मशब्दस्य षष्ठीएकवचनम् ।

A) कर्मस्य B) कर्मणि C) कर्मणा D) कर्मणः

111. युष्मच्छब्दस्य तृतीया एकवचनम् किम्?

A) त्वया B) युवाम् C) त्वत् D) युष्माकम्

112. कृञ् धातोः लिटि आत्मनेपदि प्रथमाबहु वचनम्किम्?

A) चक्रुः B) चक्रिरे C) चक्राते D) चकार

113. महाभाष्यस्य प्रथमाध्यायः ----- इति प्रसिद्धः ।

A) पस्पशाह्निकम् B) प्रथमाह्निकम् C) पूर्वपीठिका D) आद्याह्निकम्

114. वेदान्तपरिभाषायाः कर्ता कः?

A) धर्मराजः B) श्रीशङ्करः C) सदानन्दः D) भास्करः

115. अथातो ब्रह्मजिज्ञासा इति सूत्रे आनन्तर्यार्थः कस्य पदस्यार्थः?

A) अतः B) ब्रह्म C) अथ D) जिज्ञासा

116. बादरायणकृतं वेदान्तसूत्रं किम्?

A) योगसूत्रम् B) मीमांसासूत्रम् C) न्यायसूत्रम् । D) ब्रह्मसूत्रम् ।

117. अतस्मिन् तदबुद्धिरिति लक्षणेन उद्दिष्टः कः?

A) अधर्मः B) अध्यासः C) प्रकृतिः D) परा विद्या

118. व्यवहारे भाट्टनयः इति केषां मतम्?

A) तार्किकानाम् B) प्राभाकराणाम् C) वेदान्तिनाम् D) शैवानाम् ।

119. ब्रह्मसूत्रग्रन्थे अयमाचार्यःपरामृष्टोभवति।

A) जैमिनिः B) शङ्करः C) पाणिनिः D) वामनः।

120. यथोचितं योजयत-

| | |
|---|---|
| a. गोतमः | 1. मीमांसा |
| b. कपिलः | 2. न्यायः |
| c. जैमिनिः | 3. जैनमतम् |
| d. वर्धमानः | 4. सांख्यम् |

A) a-4, b-2, c-1, d-3
B) a-4, b-3, c-1, d-2
C) a-2, b-4, c-1, d-3
D) a-2, b-4, c-3, d-1